## सञ्ज्ञोऽन्यतरस्यां कर्मणि । (२२/५६७)

सम्पूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया[1]विभक्तिर्भवति । पित्रा सञ्जानीते, पितरं सञ्जानीते । मात्रा सञ्जानीते, मातरं सञ्जानीते[2] (म. भा. १.४५४) ॥

## हेतौ । (२३/५६८)

फलसाधनयोग्यः पदार्थो लोके [3]हेतुरुच्यते । [4]तद्वाचिनस्तृतीया विभक्तिर्भवति । धनेन कुलम् । कन्यया शोकः । विद्यया यशः[5] ॥

## अकर्तर्यृणे पञ्चमी । (२४/६०१)

हेतौ इति वर्तते । कर्तृवर्जितं यदृणं हेतुः, ततः पञ्चमी विभक्तिर्भवति । तृतीयाऽपवादो योगः । शताद् बद्धः । सहस्राद् बद्धः । अकर्तरि इति किम्? [6]शतेन बन्धितः । शतमृणं च भवति, [7]प्रयोजकत्वाच्च कर्तृसञ्ज्ञकम् ॥

## विभाषा गुणेऽस्त्रियाम् । (२५/६०२)

हेतौ इति वर्तते । [8]गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी विभक्तिर्भवति । जाड्याद् बद्धः, जाड्येन बद्धः । [9]पाण्डित्यान् मुक्तः, [10]पाण्डित्येन मुक्तः । [11]गुणग्रहणं किम्? धनेन कुलम् । अस्त्रियाम् इति किम्? बुद्ध्या मुक्तः । प्रज्ञया मुक्तः ॥

## षष्ठी हेतुप्रयोगे । (२६/६०७)

हेतोः प्रयोगः हेतुप्रयोगः । [12]हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति । [13]अन्नस्य हेतोर्वसति ॥

## सर्वनाम्नस्तृतीया च । (२७/६०८)

[14]सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति, षष्ठी च । पूर्वेण षष्ठ्यामेव प्राप्ताया[15]मिदमुच्यते । केन हेतुना वसति, कस्य हेतोर्वसति । येन हेतुना वसति, यस्य हेतोर्वसति ।

[१२६] निमित्तकारणहेतुषु सर्वासां [16]प्रायदर्शनम् । (म.भा. १.४५४)

---

1. विभक्तिः नास्ति इ. 2. संपूर्वः इति किम्? मातरं जानाति । पितरं जानाति । कर्मणि इति किम्? स्वरेण पुत्रं सञ्जानीते इत्यधिकम् अ. 3. हेतुरित्युच्यते ड.फ, हेतुरुच्यते लोके क.इ. 4. ततः ह, तत्र ग. 5. दारिद्र्येण कार्श्यम् इत्यधिकम् ह. 6. देवदत्तेन इत्यधिकम् ड. 7. प्रयोजककर्तृत्वाच्च कर्तृसञ्ज्ञा इ, प्रयोजककर्तृत्वाच्च ह. 8. गुणहेतौ इ.फ. 9–10. पारिचित्यात्, पारिचित्येन मुक्तं फ. 11. गुणे इति किम् फ. 12. हेतु–हेतौ नास्ति फ, हेतुशब्दप्रयोगे ह. 13. अध्ययनस्य क.ड.इ.फ. 14. हेतुप्रयोगे इति अनुवर्तते । सर्वनाम्नः तृतीयाविभक्तिर्भवति षष्ठी च हेतुशब्दप्रयोगे इत्यधिकम् ड. 15. इदं वचनम् ड, वचनमारभ्यते ग. 16. प्रदर्शनम इ.